Gyanshauryam, International Scientific Refereed Research Journal
© 2020 GISRRJ | Volume 3 | Issue 3 | ISSN : 2582-0095

# वैदिकपरम्परायां पंचमहायज्ञविमर्शः



रामकुमारी
शोधच्छात्रा,
श्रीसोमनाथसंस्कृत विश्वविद्यालय,
गुजरात एवं अतिथि प्राध्यापिका–महर्षि पाणिनि संस्कृत एवं
वैदिक विश्वविद्यालय,उज्जैन, मध्य प्रदेश, भारत

**Article Info**
Volume 3 Issue 5
Page Number: 19-24
Publication Issue :
September-October-2020
**Article History**
Accepted : 10 Sep 2020
Published : 20 Sep 2020

**सारांशः -** पितर पदेन सर्वप्रकारेण रक्षकाणां श्रेष्ठस्वभावानां ज्ञानिनां ग्रहणं भवति। अनेन यज्ञेन सृष्टेर्विकासस्य प्रक्रियायामपि महत्त्वपूर्णं योगदानं भवति। सृष्टिविकासाय ज्ञानधारायाः नैरन्तर्यार्थं च पितृयज्ञः अत्यन्तमावश्यको भवति।

**मुख्यशब्दः–** यज्ञ, वैदिकपरम्परा, पंचमहायक्षः, संस्कृत, वेदः, भारतीयसंस्कृति, देवपूजा।

वैदिकसंस्कृतेराधारभूततत्त्वेषु ''यज्ञः'' प्रधानः अस्ति। वैदिककाले भारते सर्वत्र यज्ञानां प्राधान्यमासीत्। भारतीयसंस्कृतौ गर्भादानादिषोडशसंस्कारादिषु वेदमन्त्रोच्चारणैः यज्ञानामावश्यकं विधानमस्ति। प्राचीनकाले कश्मिंचिदपि हर्षोत्सवे,पर्वणि,जन्मदिवसोपलक्ष्ये वा यज्ञानामायोजनमावश्यकं भवति स्म। यज्ञ शब्दः''यज देवपूजासंगतिकरणदानेषु'' इत्यस्माद् धातोः सिद्ध्यति। तस्य त्रयः अर्थाः भवन्ति–

1.देवपूजा

2.संगतिकरणं

3.दानम्

[1]यजुर्वेदस्य पुरुषसूक्ते ऋग्वेदस्य च पुरुषसूक्ते संसारस्योत्पत्तिर्यज्ञादेव स्वीकृता। ''यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्'' वेदेषु प्राचीनब्राह्मणारण्यकग्रन्थेषु च सर्वत्रैव यज्ञकर्मसर्वश्रेष्ठकर्मत्वेन स्वीकृतः।

[2]यज्ञो वै श्रेष्ठतमं कर्म

[3]सुन्वानायेन्द्रो ददात्याभुवं रयिम्

**Copyright :** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

[4]यज्ञो वै विष्णुः

[5]प्रजापतिवै यज्ञः

[6]अयं यज्ञो भुवनस्य नाभिः

स्वर्गकामो यजेत्

[7]ईजानाः स्वर्गं यन्ति लोकम्

वैदिककाले वैदिकधर्मे वैदिकसंस्कृतौ च यज्ञानां प्रमुखं स्थानमासीत्। अस्माकं संस्कृतिः यज्ञप्रधाना संस्कृतिरासीत्। ऋषयः मुनयः नैत्यिक,सांस्कृतिकधार्मिककृत्येषु कर्मेषु वा पंचमहायज्ञानां विधानमनिवार्यरुपेण विहितमस्ति। मनुनोक्तम् यत् प्रत्येको गृहस्थः [8]पंचविधाः हिंसाः प्रतिदिनं करोति। तासां हिंसानां प्रायश्चित्यै पंचयज्ञाः विधातव्याः सन्ति। तथा हि–

पंचसूना गृहस्थस्य चुल्लीपेषण्युपस्करः।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्।।
तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः।
पंचकलृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम्।।
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो देवौ बलिर्भौतो नृयज्ञो अतिथिपूजनम्।।

एतेषां पंचयज्ञानामनुष्ठानं कर्तव्यमेव,न कदाचिदप्येते यज्ञाः परित्यक्तव्याः इति मनु उवाच। तथा चोक्तम्–

[9]ऋषियज्ञं देवयज्ञं भूतयज्ञं च सर्वदा।
नृयज्ञं पितृयज्ञं च यथाशक्ति न हापयेत्।।

एतेषां यज्ञानां मनुष्यजीवनेन सह गभीर सम्बन्धः अस्ति। यदि मानवाः नित्यं सविधि श्रद्धया निष्ठया चैते यज्ञाः विधेयरन् चेन्मनुष्यस्य जीवनं निरन्तरमुन्नतं महत् च सम्पद्यते। अन्ते च सः मोक्षस्याधिकारी भवति। एवमेते यज्ञाः व्यक्तेः समाजस्य चोभयस्य कृते अतीव महत्त्वपूणमस्ति। एते पंचयज्ञाः ''महायज्ञ''नाम्ना अपि अभिहिताः सन्ति। यतो हि अन्ये यज्ञाः नैमित्तिकाः सन्ति परन्त्वेते यज्ञाः नैत्यिकानि कर्तव्यानि सन्ति।

1.ब्रह्मयज्ञ–

बह्मयज्ञः''ऋषियज्ञः''नाम्ना अपि उच्यन्ते। एतद्यज्ञान्तर्गते सन्ध्योपासनं स्वाध्यायः चैतद् कर्मद्वयं समाविशति। बह्मयज्ञस्य द्वितीयाङ्गम् भवति सन्ध्योपासनाम्–

[10]सन्ध्यायन्ति सन्ध्यायते वा परब्रह्म यस्यां सा सन्ध्या। अत्र परमेश्वरस्योपासना प्रामुख्यं भजते।

सन्ध्योपासनाकालः–मनुस्मृतौ मनुमहाराजः [11]द्वितीये अध्याये सन्ध्योपासनाकालं निर्दिशति। प्रातःकाले नक्षत्रशेषे आकाशे सूर्योदयं यावत् गायत्रीमन्त्रं जपन् तिष्ठेत्। तथा सायंकाले सूर्यास्तसमये यावत् प्रचुराणि नक्षत्राणि आविर्भूतानि न स्युःतावत् निरन्तरं प्रतिदिनं सन्ध्योपासनां कुर्यात्।

मनुःवदति यत् यः मनुष्यः प्रातःकालिकीं सायंकालिकी च सन्ध्यां नोपास्ते सःशूद्रवत् सम्पूर्णेभ्यो द्विजकार्येभ्यो

बहिष्कार्यः[12]–

न तिष्ठति तु यः पूर्वां नोपास्ते यश्च पश्चिमाम्।

सःशूद्रवत् बहिष्कार्यःसर्वस्माद् द्विजकर्मणः।।

प्रातःकाले कृतेन सन्ध्योपासनेन रात्रिकृतस्य पापस्य नाशो भवति। तथा च सायंकालिकी च सन्ध्यां समासीनो मनुष्यो दिवसकृतं पापं नाशयति। तथा हि –

[13]पूर्वां सन्ध्यां जपंस्तिष्ठेन् नैशमेनो व्यपोहति।

पश्चिमां तु समासीनो मलं हन्ति दिवाकृतम्।।

सन्ध्योपासनास्थानम्–

[14]अपां समीपे नियतो नैत्यकं विधिमास्थितः।

सावित्रीमप्यधीयीत गत्वा अरण्यं समाहितः।।

अर्थात् सन्ध्योपासनायाः स्थानम् नद्यादि जलसमीपे,उद्यानम् सुन्दरं वनं भवेत्। अस्यां आचमनम्,अंगस्पर्शः,मार्जनम्,प्राणायामः,अघमर्षणम्,मनसापरिक्रमा,उपस्थानमन्त्राः,नमस्कारमन्त्रादयश्च अन्तर्भवन्ति। प्राणायामेन मनुष्यस्येन्द्रियाणां सर्वेदोषाः दूरीभवन्ति। प्राणायामैः आरोग्यस्य आयुषश्च विकासो जायते।अघमर्षणमन्त्रेषु सृष्टेर्महत्त्वस्य पापनिवृत्तेश्च विधानमस्ति। मनसापरिक्रमामन्त्रेषु सूर्योपस्थानमन्त्रेषु च परमात्मनः नैकाट्यस्यानुभवो जायते। गायत्रीमन्त्रे बुद्धिं सन्मार्गे आनेतुं प्रेरणस्य प्रार्थना विधीयते। अन्ते समर्पण–नमस्कारमन्त्रैः सन्ध्योपासना समाप्यते।

अपरः स्वाध्यायः–मनुष्याः प्रतिदिनम् प्रातः सायं सद्ग्रन्थानां पठनं पाठनं चिन्तनं च कुर्युः। अनेन मानवस्य दुर्गुणानां क्षयो भूत्वा सद्गुणानामभिवृद्धिर्भवति। अन्यच्च तात्पर्यमिदमपि अवगन्तव्यं यत् मानवःप्रतिदिनम् आत्मनिरीक्षणं कुर्वन् दुर्गुणानां परित्यागपुरस्सरं सद्गुणानामभिवृद्धयर्थं प्रयतेत।

2.देवयज्ञः–

अग्निहोत्रस्य अपरं नाम भवति 'देवयज्ञः'।

[15]सायंसायं गृहपतिर्नो अग्निः प्रातःप्रातः सौमनस्य दाता।

वसोर्वसोर्वसुदान एधि वयंत्वेन्धानास्तन्वं पुषेम।।

[16]सायंसायं गृहपतिर्नो अग्निः प्रातःप्रातः सौमनस्य दाता।

वसोर्वसोर्वसुदान एधीन्धानास्त्वा शतहिमा ऋधेम।।

अर्थात् अग्निहोत्रमपि प्रातःकाले सायंकाले च विधेयम्। वेदमन्त्रोच्चारणानन्तरं ''स्वाहा'' शब्देन देवानां मुखरुपे अग्नौ हवेःसमिधनाम् नैवेद्यानाम् वा आहुतिर्विधीयते।अत्र प्रमाणं यथा–

[17]समिधाग्निं दुवस्यत घृतैर्बोधयता तिथिम्।

आस्मिन् हव्या जुहोतन।।

अनेन वातावरणं शुद्धं भवति। अयं स्थानमपि स्वच्छम् करोति। अस्मिन्

स्वस्तिमन्त्राणां,शान्तिकरणस्य,विश्वकल्याणकामनापरकाणां मन्त्राणामुच्चारणं करोति। कदाचित् एतादृशाः यज्ञाः परायणरूपेण विधीयन्ते। अत्र अनेके सामाजिकजनाः परस्परं मिलित्वा मैत्रीभावस्य विकासे सहयोगं कुर्वन्ति। अतः न केवलं व्यक्तेः विकासाय अपि च विश्वकल्याणाय अपि अत्युपयोगिनः यज्ञाः सन्ति।

3.भूतयज्ञः–

अस्य अपरं नाम [18]''बलिवैश्वदेवयज्ञः'' अपि अस्ति। अस्य विधानम् भोजनात् पूर्वम् भवति। अस्मिन् लवणान्नं विहाय मिष्ठान्न भोजनस्य आहुतयः अग्नौ प्रदीयन्ते। तदनन्तरं पितृणाम्,देवानां,श्वानकृमिपशुपक्ष्यादिप्राणिनाम् कृते भोजनादि प्रदाय ते सन्तुष्टीक्रियन्ते।

यथा मनुस्मृतौ–

वैश्वदेवस्य सिद्धस्य[19] गृह्ये अग्नौ विधिपूर्वकम्।

आभ्यः कुर्याद् देवताभ्यो ब्राह्मणो होममन्वहम्।।

अथर्ववेदे च–

[20]रात्रिरात्रिमप्रयातं भरन्तो अश्वायेव तिष्ठते घासमस्मै।

रायस्पोषेण समिषा मदन्तो मा ते अग्ने प्रतिवेशा रिषाम।।

अहरहर्बलिमित् ते हरन्तो अश्वायेव तिष्ठते घासमग्ने।।

अयमपि यज्ञः समाजकल्याणाय अपेक्षितो भवति। अनेन त्यागदानसेवाभावनानां प्रसारो जायते।

4.नृयज्ञः–

अयं यज्ञः ''अतिथियज्ञः''[21] इति नाम्ना अपि प्रसिद्धो वर्तते। [22]यत्रातिथीनां सेवनं यथावत् क्रियते तत्र सर्वाणि सुखानि भवन्तीति। अथ के अतिथयः? ये पूर्णविद्यावन्तः परोपकारिणो जितेन्द्रिया धार्मिकाः सत्यवादिनश्छलादिदोषरहिता नित्यभ्रमणकारिणो मनुष्यास्तानतिथय इति कथयन्ति। यथा प्रमाणभूताः वैदिकमन्त्राः सन्ति–

[23]तद्यस्यैव विद्वान् व्रात्यो तिथिगृहानागच्छेत्।

स्वयमेनमभ्युदेत्य ब्रूयाद् व्रात्य क्वा वात्सीर्व्रात्योदकं व्रात्य तर्पयन्तु व्रात्य यथा ते प्रियं तथास्तु व्रात्य यथा ते वशस्तथास्तु व्रात्य यथा ते निकामस्तथास्त्विति।

अस्मिन् यज्ञे अतिथिभ्यः,अभ्यागतेभ्यः,साधुभ्यः महात्मभ्यः सज्जनेभ्यश्च भोजनवस्त्रादि प्रदानेन सत्कारो विधीयते। तदा अतिथयः सन्तुष्टाः प्रसन्नाश्च भवन्ति। नृयज्ञो गृहस्थस्य श्रेष्ठं कर्म मन्यते। यज्ञेन दानेन अग्निहोत्रादिना गृहस्थस्तावत् फलं न लभते यावत् अतिथिपूजनेन लभ्यते। अतः अतिथिसेवा अवश्यमेव विधेया।

5.पितृयज्ञः–

तस्य द्वौ भेदौ स्तः–[24]एकस्तर्पणाख्यो,द्वितीयः श्राद्धाख्यश्च। तत्र येन कर्मणा विदुषो देवान्,ऋषीन्,पितृश्च तर्पयन्ति सुखयन्ति तत्तर्पणम्। यथा यत्तेषां श्रद्धया सेवनं क्रियते तत् श्राद्धम् वेदितव्यम्। सत्कर्तव्यास्त्रयो भवन्ति। देवाः,ऋषयः पितरश्च। यथा–

देवाः– पुनन्तु मा देवजनाः [25]पुनन्तु मनसा धियः।

पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा।।

पितरः– उर्जं [26]वहन्तीरमृतं घृतं पयःकीलालं परिस्त्रुतम्।

स्वधा स्थ तर्पयत मे पितृन्।।

ऋषयः– [27]तं यज्ञं बर्हिषि प्रोक्षन्पुरुषं जातमग्रतः।

तेन देवा अयजन्त साध्या ऋषयश्च ये।।

अत्र पितर पदेन सर्वप्रकारेण रक्षकाणां श्रेष्ठस्वभावानां ज्ञानिनां ग्रहणं भवति। अनेन यज्ञेन सृष्टेर्विकासस्य प्रक्रियायामपि महत्त्वपूर्णं योगदानं भवति। सृष्टिविकासाय ज्ञानधारायाः नैरन्तर्यार्थं च पितृयज्ञः अत्यन्तमावश्यको भवति।

.................................................................................................................................................

सन्दर्भग्रन्थाःसहायकग्रन्थाश्च–


1.यजुर्वेद 31.16 ऋग्वेद 1.64.35..

2.शतपथ ब्रा.1.7.1.5

3.ऋग्वेद 1.133.7

4.शतपथ ब्रा.13.1.8.8

5.कौषितकि ब्रा. 4.2

6.अथर्ववेद 9.10.4

7.अथर्ववेद 18.4.2

8.मनुस्मृतिः–3. 58–60

9.मनुस्मृति 4.21

10.पंचमहायज्ञविधिः–स्वामी दयानन्दः

11.मनुस्मृतिः 2.10

12.मनु 2.103

13.मनु 2.102

14.मनु 2.104

15.ऋग्वेदादिभाष्यभूमिका पृ–271

16..ऋग्वेदादिभाष्यभूमिका पृ–271

17.यजु. 3.1

18.मनु. 3.60

19.मनु 3.84

20.अथर्व.19.7.55.1.6.1

21.मनु. 3.60

22..ऋग्वेदादिभाष्यभूमिका पृ–298

23..ऋग्वेदादिभाष्यभूमिका पृ–298

24..ऋग्वेदादिभाष्यभूमिका पृ–277

25.यजु.19.39

26.यजु. 2.34

27.यजु. 31.9